08-08-2020

अनिवार्यपत्रम्। शास्त्री II

व्याकरणछात्र हेतु: साहित्यम्। रघुवंशम्। श्लोकव्याख्या।

॥ नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण।
सिद्धाश्रमं शान्तमिवैत्य सत्त्वैर्नैसर्गिकोऽप्युत्ससृजे विरोधः॥

सन्दर्भः→ कविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादिन्दुमती-स्वयंवरवर्णनायुद्धृतमस्ति पद्यमिदम्।

प्रसङ्गः→ अत्र सुनन्दा इन्दुमतीं प्रति नीपकुलजातस्य राज्ञः सुषेणस्य परिचयं सोपमं वर्णयति।

अन्वयः→ यज्वा एष पार्थिवः नीपान्वयः यम् आश्रित्य गुणैः शान्तं सिद्धाश्रमम् एत्य सत्त्वैः इव नैसर्गिकः अपि परस्परेण विरोधः उत्ससृजे।

शब्दार्थः व्याकरणञ्च → यज्वा = यज्ञकर्ता। एषः = अयम्। पार्थिवः → पृथिव्या ईश्वरः = राजा, नृपः। नीपान्वयः → नीप एव अन्वयो यस्य सः = नीपकुलजः, नीपकुलोत्पन्नः। यम् = सुषेणं राजानम्। आश्रित्य → आ + श्रि + ल्यप् = शरणं गत्वा। गुणैः = सत्यज्ञानादिभिः। शान्तम् = निर्विकारस्वरूपम्। सिद्धाश्रमम् = तपोवनम्। एत्य = प्राप्य। सत्त्वैः = हिंस्रजीवैः। इव = यथा। नैसर्गिकः - स्वाभाविकः। अपि = एवम्। परस्परेण = मिथः, इतरेतर। विरोधः = शत्रुभावः। उत्ससृजे = परित्यक्तः।

तात्पर्यः→ सुनन्दानुसारेण एष यज्ञकर्ता नीपवंशजः राजा सुषेणः अस्ति, यं प्राप्य ज्ञानादिगुणाः परस्परंविरोधस्वभावं तथैव परित्यक्तवन्तः यथा तपोवने हिंस्रजीवाः सर्वं वैरभावं परित्यज्य विचरन्ति इति भावः।

विशेषः→ अत्र शृङ्गाररसः, वैदर्भीरीतिः, प्रसादगुणः, उपमालङ्कारः, उपजातिवृत्तञ्च।

08-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

08-08-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । हितोपदेशः । श्लोकव्याख्या ।

"वरं वनं व्याघ्रगजेन्द्रसेवितं, द्रुमालयं पक्वफलाऽम्बुभोजनम् ।
तृणानि शय्याः परिधानवल्कलं, न बन्धुमध्ये धनहीनजीवनम् ॥"

सन्दर्भः→ श्लोकोऽयं श्रीनारायणपण्डितेन विरचितस्य हितोपदेशात् ग्रन्थात् मित्रलाभाद् भागात् मूषक-परिव्राजक कथात् गृहीतोऽस्ति।

प्रसङ्गः→ परिव्राजकापहृतधनविहीनस्य मूषकस्येदं कथनम् । धनहीनस्य का स्थितिः, कीदृशम् स्य जीवनं भवति ? अस्मिनुपरि मूषकः विचारयति ।

अन्वयः→ वनं व्याघ्रगजेन्द्रसेवितं, द्रुमालयं पक्वफलाम्बुभोजनं, तृणानि शय्याः, परिधानवल्कलं वरं (भवति) बन्धुमध्ये धनहीनजीवनं न ।

शब्दार्थः व्याकरणञ्च → वनम् = अरण्यम् (वन् + अच्) ।
व्याघ्रगजेन्द्रसेवितम् → व्याघ्रगजेन्द्राभ्यां सेवितम् ।
व्याघ्रः → वि+ आ + √घ्रा + क = चित्रकः, हिंसकः पशुः वा ।
गजेन्द्रः → गज + इन्द्रः = गजश्रेष्ठः । सेवितम् → सेव् + क्त ।
द्रुमालयम् → (द्रुम + आलयम्) द्रुमा एव आलयाः यत्र तत् = वृक्षादिनिर्मिताऽऽवासम् । पक्वफलाम्बुभोजनम् → पक्वानि फलानि अम्बु च भोजनं यत्र तत् । वरम् = श्रेष्ठम् ।
तृणम् = घासः । शय्याः → √शी + क्यप् + टाप् = बिस्तरम् ।
परिधानम् = परि + √धा + ल्युट् = वस्त्रम् । वल्कलम् → वल् + कलच् = वृक्षत्वक् । जीवनम् → √जीव् + ल्युट् = प्राणयुक्तम् ।

विशेषः→ हिंसकप्राणियुक्तवने कुटीरे तृणशय्यायां वल्कलं धारयन् जीवनयापनं श्रेयस्करं भवति न तु धनहीनं भूत्वा बन्धुमध्ये व्यवसन् ।

अलङ्कारः → अर्थान्तरन्यासः ।

डॉ० निर्मलकुमारझा, (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

08-08-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । कृत् प्रत्ययः । भाग - ५.

क्त, क्तवतु ।

1. क्तक्तवतू निष्ठा → एतौ निष्ठासंज्ञौ स्तः ।
अनुबन्धलोपे जाते 'क्त' इत्यस्मिन् त शेषः
'क्तवतु' इत्यस्मिन् तवत् शेषः भवति ।

2. निष्ठा → भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् ।
भूतकाले धातुना सह क्त तथा च क्तवतु
प्रत्ययस्य प्रयोगः भवति ।

अनयोः प्रत्ययोः रूपं वाक्ये लिङ्गानुसारेण विभक्त्यानुसारेण विशेष्यानुसारेण भवति ।

क्तवतु प्रत्ययस्य प्रयोगः भूतकालस्य वाक्ये कर्तृवाच्ये भवति।
यथा → स भुक्तवान् ( उसने खाया )

क्त प्रत्ययस्य प्रयोगः भूतकाले कर्मवाच्ये भाववाच्ये च भवति। यथा → रामेण सीता त्यक्ता । ← कर्मवाच्ये।

भाववाच्ये क्त प्रत्ययान्त शब्दः सर्वदा प्रथमा विभक्तौ नपुंसकलिङ्गे एकवचने च भवति । यथा →
स्नातं मया । ← मेरे द्वारा स्नान किया गया

| कर्मवाच्ये ( धातु + क्त प्रत्ययः ) भूतकाले भाववाच्ये च। | कर्तृवाच्ये भूतकाले ( धातु + क्तवतु ) |
|---|---|
| √भू + क्त = भूतः | √भू + क्तवतु = भूतवान् , |
| एवं प्रकारेण गतः, पठितः, आगतः दृष्टः, पीतः, जितः, पतितः, नीतः, वदितः, लब्धः, मृतः, कृतः, भुक्तः, क्रीतः, गृहीतः, अर्चितः, भीतः, सेवितः, आदयः | गतवान् , पठितवान् , आगतवान् , दृष्टवान् , पीतवान् , जितवान् , पतितवान् , नीतवान् , वदितवान् , लब्धवान् , मृतवान् , कृतवान् , भुक्तवान् , गृहीतवान् , अर्चितवान् । |

डॉ० निर्मल कुमार झा, (सं० प्राचार्य) ।
रा० उ० सं० महावि० सुरखसैना, पूर्णियाँ ।